॥ अथ श्रीयादवार्यकृतप्रार्थनापंचकस्तोत्रं ॥

शरीरचेष्टा मम ते प्रणामः स्तुतिस्तु वागिंद्रियवृत्तिरस्तु ।
सर्वा मनोवृत्तिरनुस्मृतिस्ते सर्वं तवाराधनमेव भूयात् ।१।
गुरोः सुसंगोस्तु दया च सेवा जन्मांतरे तस्य गृहे जनिश्च ।
श्रीमध्वशास्त्रश्रवणं मम स्यादनंतकालेन सुपुण्यहेतुः ।२।
दारेषु पुत्रेषु सुहृत्समित्रजनेषु शिष्येषु गुरौ प्रियेषु ।
प्रीतिर्ममस्यात् सततं गरीयसी प्रियेतरे प्रीतिविपर्ययस्स्यात् ।३।
कोपो गुरूणां मयि नैव भूयात् दया गुरूणां मयि सर्वदा स्यात् ।
निर्मायसेवा सततं मयि स्यान्निरूपमा पूर्णदया मयि स्यात् ।४।
पिता च माता च सुहृत्सुबंधुर्भ्राता सखा मे परदेवता च ।
भक्तिं प्रदेहि भगवंस्त्वयि निश्चलां मे नित्यं त्वदीयपदपद्मनिषेवणं च ।५।

॥ इति श्रीयादवार्यकृतप्रार्थनापंचकस्तोत्रं संपूर्णं श्री कृष्णार्पणमस्तु ॥